प्रथमा दीक्षा : सम्भाषणम्

मित्राणां गृहागमनम्

एतत् (पुं) /स्त्री/नपुं

एव/किञ्चित्

पुत्री - अम्ब । मम मित्राणि आगतानि सन्ति , परिचयं कारयामि। आगच्छतु।

माता - आगतवती । सर्वेभ्यः नमस्कारः ।

पुत्री - एषः रमेशः । एतसेय पिता वित्तकोषे कार्यं करोति ।

माता - अत्र स्नेहा का ?

पुत्री - सा नागवती । तस्याः अम्बायाः अस्वास्थ्यम् अस्ति । एषा दिव्या, अस्माकं गृहसमीपे एव वसति ।

माता - एतस्याः अम्बाम् अहं जानामि । सा प्रतिदिनं राघवेन्दिरमन्दिरम् आगच्छति ।

पुत्री - एषः आनन्दः । सर्वान् सदा आनन्दयति । कक्ष्यायाम् अपि सर्वत्रप्रथमं स्थानं प्राप्नोति ।

माता - तं किरणं जानामि । किरण । कथं मौनेन स्थितवान् भवान् ?

किरणः - मम किञ्चित् शिरोवेदना ।

पुत्री - एषा मङ्गला, एषा रोहिणी, एषा कविता, सा ज्योतिः ।

माता - सः कः भोः, अनते उपविष्टवान् ।

पुत्री - तस्य परिचयं वदामि, कुतः त्वरा ? सः एव अस्माकं मुख्यशिक्षकस्य पुत्रः गोपालः, अस्माकं गणप्रमुखः। तस्य गुणकीर्तनं कर्तुम् एकं दिनं न पर्याप्तम् ।

माता - अलम् अतिविस्तरणे ।

पुत्री - अम्ब । भवती केवलं वचनेन एव मम मित्राणि प्रेषयति उत किमपि खादितुं ददाति ?

माता - अस्तु भवती अस्माकं गृहं दर्शयतु, तावता अहं खाद्यं सज्जीकरिष्यामि ।

पुत्री -मित्राणि । एषा मम माता अन्नपूर्णा । साक्षात् अन्नपूर्णेश्वरी । आगच्छन्तु, गृहं सर्वं दर्शयामि ।

एषः मम अध्ययनप्रकोष्ठः एषा पाकशाला, दूरतः एव पश्यन्तु, यतः अन्तः प्रवेशः अनुमतिं विना नास्ति।

एतत् प्रार्थनामन्दिरम् । वयं सर्वं प्रातः सायं च मिलित्वा प्रार्थनां कुर्मः । एषः विशालः सभामण्डपः ।

अत्रैव विशेषदिनेषु कार्यक्रमः भवति । एवम् अस्माकं लघु गृहं, सुव्यवस्थितगृहम् । आगच्छन्तु उपाहारं स्वीकुर्मः ।